चिच्युषे । 'च्युङ गतौ' (धा. पा. ९५६) इत्यस्य धातोः लिटि सेशब्दे अभ्यासस्य सम्प्रसारणम् [1]अनिट् च [2]निपातनात् । 'चिच्युषे' (ऋ. ४.३०.२२) । चुच्युविषे इति भाषायाम् ।

तित्याज[3] । 'त्यज हानौ' (धा.पा. ९८७) इत्यस्य धातोः लिटि अभ्यासस्य सम्प्रसारणं निपात्यते । 'तित्याज' (ऋ. १०.७१.६) । तत्याज इति भाषायाम् ।

श्रातः इति । 'श्रीञ् पाके' (धा.पा. १४७६) इत्येतस्य धातोः निष्ठायां श्राभावः । 'श्रातास्त इन्द्रसोमाः' (मै. १.९.१) ।

श्रितम् इति तस्यैव [4]श्रीणातेः ह्रस्वत्वम् । 'सोमो गौरी अधिश्रितः' (ऋ. ९.१२.३) । श्रिता नो गृहाः । अनयोः [5]श्राभावश्रिभावयोर्विषयविभागमिच्छति,[6] सोमेषु बहुषु श्राभाव एव, अन्यत्र श्रिभावः इति । सोमादन्यत्र क्वचिदेकस्मिन्नपि श्राभावो दृश्यते । 'यदि श्रातो जुहोतन' (ऋ. १०.१७९.१) । तस्य श्राताः इति बहुवचनस्याविवक्षितत्वाद् उपसंग्रहो [7]द्रष्टव्यः ।

आशीः, आशीर्तः इति । [8]तस्यैव श्रीणातेराङ्पूर्वस्य क्विपि निष्ठायां च शीरादेशः, [9]निष्ठायाश्च नत्वाभावो निपातनात् । [10]तामाशीरा दुहन्ति । आशीर्त ऊर्जम् । 'क्षीरैर्मध्यत आशीर्तः' (ऋ. ८.२.९) ॥

## न सम्प्रसारणे सम्प्रसारणम् । (३७/३६३)

सम्प्रसारणे परतः पूर्वस्य यणः सम्प्रसारणं न भवति । व्यध–विद्धः । [11]व्यच – विचितः । व्येञ् – संवीतः ।

[12]एकयोगलक्षणमपि सम्प्रसारणमत एव वचनात् [13]प्रथमं परस्य यणः क्रियते, पूर्वस्य च [14]प्रसक्तं प्रतिषिध्यते । सम्प्रसारणम् इति वर्तमाने पुनः सम्प्रसारणग्रहणं विदेशस्थस्यापि सम्प्रसारणस्य प्रतिषेधो यथा स्यात् इति । 'श्वयुवमघोनामतद्धिते' (६.४.१३३/३६२)–यूनः । यूना । [15]सम्प्रसारणग्रहणसामर्थ्यात् एव पूर्वस्य प्रतिषेधे वक्तव्ये सवर्णदीर्घत्वमेकादेशो न स्थानिवद् भवति । [16]सति वा [17]स्थानिवत्त्वे व्यवधानमे[18]तावदाश्रयिष्यते ।

[६६४] ऋचि त्रेरुत्तरपदादिलोपश्छन्दसि[19] । (म. भा. ३.३३)

ऋचि परतः त्रेः सम्प्रसारणं भवति उत्तरपदादिलोपश्च छन्दसि विषये । तिस्र ऋचः यस्मिन् तत् तृचं सूक्तम् । तृचं साम (म. भा. ३. ३३) । 'ऋक्पूरब्धूःपथामानक्षे' (५.४.७४/९४०) इति [20]समासान्तः । छन्दसि इति किम् ? त्यृचं कर्म ।

[६६५] रयेर्मतौ बहुलम् । (म. भा. ३.३३)

रयिशब्दस्य छन्दसि [21]विषये मतौ परतो बहुलं सम्प्रसारणं भवति । [22]आ रेवानेतु नो विशः । [23]न च भवति । रयिमान् पुष्टिवर्धनः (वा. सं. ३.४०) ॥

---

1. अनिट्त्वं क. ड. 2. निपात्यते ड. 3. इति इत्यधिकम् 4. श्रीणातेः नास्ति फ. 5. च इत्यधिकम् फ. 6. केचित् इत्यधिकम् फ. 7. वेदितव्यः क. 8. तस्यैव नास्ति फ. 9. निष्ठायां च फ. 10. तमाशिरं दुहे आशीर्तं ऊर्जम् ड. 11. व्यचेः ह. 12. एकयोगनिर्दिष्टमपि फ. 13. पूर्वं ग.क.फ. 14. प्रसक्तं नास्ति फ. 15. पुनः पुनः इत्यधिकम् क, पुनः इत्यधिकम् ह. 16. सति वा नास्ति क. 17. स्थानिवद्भावे फ. 18. एतावता क. 19. विषये इत्यधिकम् ग. 20. अकारः इत्यधिकम् क. 21. विषये नास्ति फ. 22. आरेवां च ते विशः क. 23. छन्दसि इति किम् ? इत्यधिकम् फ.